# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ५३

ब्रुवद्भिरेवमृषिभिः काकुत्स्थो वाक्यमब्रवीत् ।
किं कार्यं ब्रूत भवतां भयं नाशयितास्मि वः ॥ १ ॥

तथा वदति काकुत्स्थे भर्गवो वाक्यमब्रवीत् ।
भयं नः शृणु यन्मूलं देशस्य च नरेश्वर ॥ २ ॥

पूर्वं कृतयुगे राम दैतेयः सुमहाबलः ।
लोलापुत्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः ॥ ३ ॥

ब्रह्मण्यश्च शरण्यश्च बुद्ध्या च परिनिष्ठितः ।
सुरैश्च परमोदारैः प्रीतिस्तस्यातुलाभवत् ॥ ४ ॥

स मधुर्वीर्यसम्पन्नो धर्मे च सुसमाहितः ।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः ॥ ५ ॥

शूलं शूलाद्विनिष्कृष्य महावीर्यं महाप्रभम् ।
ददौ महात्मा सुप्रीतो वाकयं चैतदुवाच ह ॥ ६ ॥

त्वयायमतुलो धर्मो मत्प्रसादात्कृतः शुभः ।
प्रीत्या परमया युक्तो ददाम्यायुधमुत्तमम् ॥ ७ ॥

यावत्सुरैश्च विप्रैश्च न विरुध्येर्महासुर ।
तावच्छूलं तवेदं स्यादन्यथा नाशमाप्नुयात् ॥ ८ ॥

यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः ।
तं शूलं भस्मसात्कृत्वा पुनरेष्यति ते करम् ॥ ९ ॥

एवं रुद्राद्वरं लब्ध्वा भूय एव महासुरः ।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह ॥ १० ॥

भगवन्मम वंशस्य शूलमेतदनुत्तमम् ।
भवेत्तु सततं देव सुराणामीश्वरो ह्यसि ॥ ११ ॥

तं ब्रुवाणं मधुं देवः सर्वभूतपतिः शिवः ।
प्रत्युवाच महादेवो नैतदेवं भविष्यति ॥ १२ ॥

मा भूत्ते विफला बाणी मत्प्रासादकृता शुभा ।
भवतः पुत्रमेकं तु शूलमेतद्गमिष्यति ॥ १३ ॥

यावत्करस्थः शूलोऽयं भविष्यति सुतस्य ते ।
अवध्यः सर्वभूतानां शूलहस्तो भविष्यति ॥ १४ ॥

एवं मधुवरं लब्ध्वा देवात्सुमहदद्भुतम् ।
भवनं चासुरश्रेष्ठः कारयामास सुप्रभम् ॥ १५ ॥

तस्य पत्नी महाभगा प्रिया कुम्भीनसी हि या ।
विश्वासयोरपत्यं सा ह्यनलायां महाप्रभा ॥ १६ ॥

तस्याः पुत्रो महावीर्यो लवणो नाम दारुणः ।
बाल्यात्प्रभृति दुष्टात्मा पापान्येव समाचरत् ॥ १७ ॥

तं पुत्रं दुर्विनीतं तु दृष्ट्वा दुःखसमन्वितः ।
मधुः स शोकमापेदे न चैनं किं चिदब्रवीत् ॥ १८ ॥

स विहाय इमं लोकं प्रविष्टो वरुणालयम् ।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत् ॥ १९ ॥

स प्रभावेन शूलस्य दौरात्म्येनात्मनस्तथा ।
सन्तापयति लोकांस्त्रीन्विशेषेण तु तापसान् ॥ २० ॥

एवम्प्रभावो लवणः शूलं चैव तथाविधम् ।
श्रुत्वा प्रमाणं काकुत्स्थं त्वं हि नः परमा गतिः ॥ २१ ॥

बहवः पार्थिवा राम भयार्तैरृषिभिः पुरा ।
अभयं याचिता वीर त्रातारं न च विद्महे ॥ २२ ॥

ते वयं रावणं श्रुत्वा हतं सबलवाहनम् ।
त्रातारं विद्महे राम नान्यं भुवि नराधिपम् ।
तत्परित्रातुमिच्छामो लवणाद्भयपीडिताः ॥ २३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com